# COMMON PRE-BOARD EXAMINATION 2022-23

## Subject: SANSKRIT – 122

कक्षा – दशमी

समयः - 3 होराः　　　　　　　　　　　　　　　　　　　　　　　　पूर्णाङ्काः - 80

Date:

**सामान्यनिर्देशाः**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 14 पृष्ठानि मुद्रितानि सन्ति ।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति ।
3. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।
4. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

### प्रश्नपत्रस्वरूपम् -

| | |
|---|---|
| 'क' खण्डः - अपठितावबोधनम् | 10 अङ्काः |
| 'ख' खण्डः - रचनात्मककार्यम् | 15 अङ्काः |
| 'ग' खण्ड: - अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| 'घ' खण्ड: - पठितावबोधनम् | 30 अङ्काः |

## 'क' खण्डः

## अपठितावबोधनम् (10 अङ्काः)

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 10**

एकदा एकः सिंह: मृगयायै वने अभ्रमत् । परं स: किञ्चित् अपि न प्राप्तवान् । तदा सः शृगालस्य एकं शिशुम् अपश्यत्। सः तं गृहम् आनयत् । सिंह: सिंहीम् अवदत् – "एषः शावक: तव भोजनम् अस्ति। एतं खादित्वा तृप्ता भव।" सिंही प्रत्यवदत् "एष: लघुः। एतं मारयितुं न इच्छामि। एतम् अहम् पालयिष्यामि। एष: मम तृतीयः पुत्रः भविष्यति। एतौ मम पुत्रौ अस्य अनुजौ भविष्यतः । एषः मम पुत्राभ्यां सह खेलतु" इति। एकदा ते वने अखेलन्। तदा एकं गजं दृष्ट्वा सिंहस्य शावक: अकथयत् – "एषः अस्माकं शत्रुः । एतं वयं मारयिष्यामः"। शृगालस्य शावकः गजं दृष्ट्वा भयभीतः अभवत्, गृहम् प्रति च अधावत्। गृहं गत्वा अनुजौ अम्बाम् अवदताम्-"आवयोः अग्रजः कातरः अस्ति। सः गजं दृष्ट्वा गृहं प्रति अधावत्" इति।

**अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) 1x2=2**

(i) कः मृगयायै वने अभ्रमत्?

(ii) सिंही कं मारयितुं न इच्छति ?

(iii) ते कुत्र अखेलन्?

**आ. पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्) 2x2=4**

(i) सिंह: कं गृहम् आनयत् ?

(ii) श्रृगालशावक: सिंह्या: कतमः पुत्रः भविष्यति?

(iii) श्रृंगालशावकः कं दृष्ट्वा भयभीतः अभवत् ?

**इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1**

**ई. यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्) 1x3=3**

(i) 'सः तं शावकं गृहम् आनयत्' अस्मिन् वाक्ये कर्तृपदं किम् ?

(क) शावकं (ख) गृहम्

(ग) सः　　　　　　　　　　(घ) आनयत्

(ii) 'सिंहस्य शावकः अकथयत्' अत्र क्रियापदं किमस्ति?

(क) अकथयत्　　　　　　　　　(ख) सिंहस्य

(ग) शावकः　　　　　　　　　(घ) शिशवः

(iii) 'एषः अस्माकं शत्रुः' अस्मिन् वाक्ये 'एषः' इति पदं कस्मै प्रयुक्तम्?

(क) सिंहाय　　　　　　　　　(ख) गजाय

(ग) शृगालशावकाय　　　　　　(घ) सिंहशावकाय

(iv) गजः केषां शत्रुः?

(क) गजानाम्　　　　　　　　(ख) सिंहानाम्

(ग) शावकानाम्　　　　　　　(घ) जन्तूनाम्

## 'ख' खण्डः

### रचनात्मकं कार्यम्　　　　(15 अङ्काः)

**2. भवान् सुजनछात्रावासात् दिनेशः अस्ति । स्वमित्रं राघवं प्रति लिखितं पत्रं मञ्जूषायाः पदैः पूरयित्वा पुनः लिखत -** ½x10= 5

सुजनछात्रावासात्

दिनाङ्कः --------

प्रिय मित्र राघव!

(i) ___________ ।

अत्र कुशलं तत्रास्तु । अहं (ii) __________ सज्जायां व्यस्तः आसम् ।अतः विलम्बेन तव पत्रस्य उत्तरं ददामि । अस्मिन् वर्षे मयापि गणतन्त्रदिवसस्य

शोभायात्रायां भागः (iii) _______ । अस्माकं विद्यालयस्य छात्राः राजपथे (iv) ________

प्रदर्शनम् अकुर्वन् । अहं गरबानृत्यस्य (v) _______ आसम् । छात्राणां राष्ट्रगानस्य ओजस्वी

ध्वनिः (vi) ______ गुञ्जितम् अकरोत् । स्वराष्ट्रस्य सैन्यबलानां पराक्रमप्रदर्शनानि,

विचित्रवर्णानि परिदृश्यानि, (vii) _______ च दृष्ट्वा अहं गौरवान्वितः अस्मि । (viii) _______

बाल्यावस्थायाः स्वप्नः तत्र पूर्णः जातः । (ix) ______ वन्दनीयौ ।

भवतः (x) ________

दिनेशः

**मञ्जूषा**

| |
|---|
| गृहीतः, पितरौ, नमस्ते, मम, मित्रम्, राजपथम्, लोकनृत्यानि, |
| लोकनृत्यस्य, गणतन्त्रदिवससमारोहस्य, प्रमुखसञ्चालकः |

3 **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत -** 1x5=5



**मञ्जूषा**

| |
|---|
| आपणम्, स्वास्थ्यवर्धनम्, फलविक्रेता, भक्षणम्, कदलीफलानि, द्राक्षाफलानि, मधुकर्कटिका, अमृतफलम्, नारिकेलानि, जम्बूफलानि, ग्राहकाय, तोलयति |

**अथवा**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत -** 1x5=5

**" विद्याधनं सर्वधनप्रधानम् "**

**मञ्जूषा**

| |
|---|
| विद्या, आवश्यकता, ज्ञानम्, बुद्धिम्, विद्यायाः, पशुः, धनम्, लोके, विद्याविहीनः नाम, मानवस्य, विकासयति |

**4.** **अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत - (केवलं वाक्यपञ्चकम्)** 1x5=5

1. माता जल लाती हैं।
   Mother brings water.
2. हम दोनों संस्कृत पढ़ते हैं।
   Both of us read Sanskrit.
3. कल गोविन्द विजयनगर गया।
   Yesterday Govind went to Vijaynager.
4. तुम यहाँ बैठो ।
   You sit here.
5. अमृता कहाँ थी ?
   Where was Amritha ?
6. हम सब खेलने जाएँगे ।
   All of us will go to play.
7. तुम कब आओगे ?
   When will you come?

'ग' खण्ड:

## अनुप्रयुक्तव्याकरणम् (**25** अङ्काः)

**5.** **अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- (केवलं प्रश्नचतुष्टयम्)** 1x4=4

(i) **अचिरात् + एव** प्रवर्षः समजायत ।

(ii) जातं **प्रकृतिरेव** शरणम्।

(iii) नय माम् **अस्मात् + नगरात्** बहुदूरम् ।

(iv) अयम् **एकस्तावत्** विभज्य भुज्यताम्।

(v) नास्ति **किञ्चित् + निरर्थकम्** ।

**6.** **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)** **1x4=4**

(i) **नीलकण्ठं** नमामि ।

(क) नीलेन कण्ठेन (ख) नीलाय कण्ठाय

(ग) नील: कण्ठ: यस्य तं (घ) नीलं च कण्ठं च

(ii) **उपग्रामं** वसामि ।

(क) ग्रामम् अनु (ख) ग्रामस्य समीपे

(ग) ग्रामम् अनतिक्रम्य (घ) ग्रामेण सहितम्

(iii) **हरिणा त्रात:** जीवति चिरम्।

(क) हरित्रातः (ख) हरिःत्रात:

(ग) हरिंत्रात: (घ) हरत्रात:

(iv) ततः प्रविशत: तापसौ **कुशलवौ**।

(क) कुशेन लवौ (ख) कुशम् इव लवौ

(ग) कुशौ च लवौ च (घ) कुश: च लव: च

(v) युवामपि न तु **रक्षकः च रक्षकः च** ।

(क) रक्षक: (ख) रक्षकाः

(ग) रक्षकौ (घ) रक्षकाश्च

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति- प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्टयम्)** **1x4=4**

(i) शतादीनां **सहिष्णुता**

(क) सहिष्णु + त्व (ख) सहिष्णु + तल्

(ग) सहिष्णु + मतुप् (घ) सहिष्णु + ताल्

(ii) **स्थिरत्वं** लाघवं मृजा ।

(क) स्थिर + मतुप् (ख) स्थिर + टाप्

(ग) स्थिर + त्व (घ) स्थिर + तुप्

(iii) **बुद्धिमान्** सदैव सफलः भवति ।

(क) बुद्धिमत् + मतुप् (ख) बुद्धिमा + न्

(ग) बुद्धि + मान् (घ) बुद्धि + मतुप्

(iv) देशस्य सेवा अस्माकं **नीति +ठक्** कर्त्तव्यम् अस्ति।

(क) नैतिकः (ख) नैतिकी

(ग) नैतिकम् (घ) नैतिकाः

(v) मम **अध्यापिका** स्नेहेन पाठयति।

(क) अध्यापिका + टाप् (ख) अध्यापक + ङीप्

(ग) अध्यापक + टाप् (घ) अध्या + पिका

**8.** **वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनःलिखत - (केवलं प्रश्नत्रयम्)** **1x3=3**

(i) **वरुणः** –उमे ! किं त्वं प्रातः पञ्चवादने _________ ?

(क) उत्तिष्ठति (ख) उत्तिष्ठतः

(ग) उत्तिष्ठसि (घ) उत्तिष्ठामि

(ii) **उमा** -आम् ! मया प्रातः पञ्चवादने _________ ।

(क) उत्थीयते (ख) उत्तिष्ठीयते

(ग) उत्तिष्ठिष्यते (घ) उत्तिष्ठामि

(iii) **वरुणः** - किं तदा त्वम् पुस्तकं _________ ?

(क) पठ्यते (ख) पठति

(ग) पठसि (घ) पठतः

(iv) **उमा** - आम् ! ___________ तदा पुस्तकं पठ्यते ।

(क) मया (ख) अहं

(ग) वयं (घ) माम्

**9.** **कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत- (केवलं प्रश्नचतुष्टयम्)** **1x4=4**

(i) महेशः प्रात: 8:30 _________ वादने विद्यालयं गच्छति ।

(ii) सः नित्यं 6:15 _________ वादने भ्रमणाय गच्छति ।

(iii) भैरव: प्रात: 7:00 _______ वादने पूजां करोति ।

(iv) सुनीतिः सायं 5:30 ________ वादने भ्रमति ।

(v) सोमदत्तः रात्रौ 9:45 _________ वादने वार्ताः शृणोति ।

**10.** **मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत- (केवलं प्रश्नत्रयम्)** **1x3=3**

(i) रमा __________ अशोकनगरम् गमिष्यति ।

(ii) राजेन्द्रः _______ गृहं गतवान् ।

(iii) भवान् _________ किं करोति ?

(iv) रमेश: पुस्तकं लेखनीं ________ क्रीणाति ।

**मञ्जूषा**

| | | | |
|---|---|---|---|
| च, | श्वः, | ह्यः, | इदानीम् |

**11.** **अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनःलिखत- (केवलं प्रश्नत्रयम्)** **1x3=3**

(i) बालकौ ग्रामं **<u>गच्छति</u>** ।

(क) गच्छतः (ख) गच्छामि

(ग) गच्छसि (घ) गच्छन्ति

(ii) ते पाठं **<u>पठति</u>** ।

(क) पठन्ति (ख) पठामि

(ग) पठावः (घ) पठसि

(iii) वृक्षात् **<u>फला:</u>** पतन्ति ।

(क) फलेन (ख) फले

(ग) फलानि (घ) फलस्य

(iv) कवि: श्वः कवितां **<u>अपठत्</u>** ।

(क) अपठताम्　　　　　　　　　　　(ख) पठिष्यति

(ग) अपठन्　　　　　　　　　　　(घ) अपठः

## 'घ' खण्ड:

## पठितावबोधनम्　　　　(30 अङ्काः)

**12.** **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत** – **5**

एकस्मिन् ग्रामे राजसिंहः नाम राजपुत्रः वसति स्म । एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता । मार्गे गहनकानने सा एकं व्याघ्रं ददर्श । सा व्याघ्रमागच्छन्तं दृष्ट्वा धार्ष्ट्यात् पुत्रौ चपेटया प्रहृत्य जगाद "कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद् विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।"इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्टः। भयाकुलं व्याघ्रं दृष्ट्वा कश्चित् धूर्तः शृगालः हसन्नाह - "भवान् कुतः भयात् पलायितः?"

**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) )** 1/2x2=1

(क) ग्रामे कः राजपुत्रः वसति स्म ?

(ख) बुद्धिमती कया पुत्रौ प्रहृतवती ?

(ग) मार्गे गहनकानने सा किं ददर्श ?

**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)** 1x2=2

(क) बुद्धिमती पुत्रौ किं जगाद ?

(ख) बुद्धिमती पुत्रद्वयोपेता कुत्र चलिता ?

(ग) तस्याः वचनानुसारं पुत्रौ कथं कलहं कुरुतः?

**इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** 1x2=2

(क) 'पत्नी' इत्यस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

(ख) 'चलिता' इति क्रियापदस्य कर्तृपदं किम् ?

(ग) 'कानने' इति पदस्य किं विशेषणपदं गद्यांशे प्रयुक्तम् ?

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** **5**

क्रोधो हि शत्रुः प्रथमो नराणां, देहस्थितो देहविनाशनाय।
यथास्थितः काष्ठगतो हि वह्निः, स एव वह्निर्दहते शरीरम्।।

**अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम् )** 1/2x2=1

(क) नराणां कः प्रथमो शत्रुः?

(ख) प्रथमशत्रुणा कस्य विनाशः भवति ?

(ग) नराणां प्रथमो शत्रुः कुत्र स्थितः ?

**आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्))** 1x2=2

(क) वह्निः कुत्र स्थितः ?

(ख) कः शरीरं दहते ?

(ग) क्रोधः केन सदृशः प्रोक्तः?

**इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** 1x2=2

(क) 'स एव वह्निर्दहते शरीरम्' अस्मिन् वाक्ये क्रियापदं किम्?

(ख) ' मनुष्याणाम् ' इत्यस्य किं पर्यायपदं प्रयुक्तम्?

(ग) 'प्रथमो शत्रुः ' अत्र विशेषणपदं किम् अस्ति?

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत** – **5**

**सिंहः** - (क्रोधेन गर्जन्) भोः! अहं वनराजः किं भयं न जायते? किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा?

**वानरः** - यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः। राजा तु रक्षकः भवति परं भवान् तु भक्षकः। अपि च स्वरक्षायामपि समर्थः नासि तर्हि कथमस्मान् रक्षिष्यसि ?

**काकः** - आम् सत्यं कथितं त्वया - वस्तुतः वनराजः भवितुं तु अहमेव योग्यः।

**पिक:** - (उपहसन्) कथं त्वं योग्यः वनराजः भवितुं, यत्र तत्र का-का इति कर्कशध्वनिना वातावरणमाकुलीकरोषि । न रूपम्, न ध्वनिरस्ति। कृष्णवर्णम् मेध्यामेध्यभक्षकं त्वां कथं वनराजं मन्यामहे वयम् ?

**अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम् )** 1/2x2=1

(i) 'अहं वनराजः, किं भयं न जायते' इति गर्जन् कः कथयति ?

(ii) 'त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः' इति वानरः कं वदति?

(iii) राजा तु कः भवति?

**आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** 1x2=2

(i) कः स्वरक्षायामपि समर्थः नास्ति ?

(ii) कस्य ध्वनिः कर्कशः भवति ?

(iii) कः मेध्यामेध्यभक्षकः ?

**इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** 1x2=2

(i) 'भवान् तु भक्षकः' इत्यत्र विशेषणपदं किम् ?

(ii) 'त्वां कथं वनराजं मन्यामहे वयम् ?' अस्मिन् वाक्ये कर्तृपदं किमस्ति ?

(iii) 'कथमस्मान् रक्षिष्यसि' अत्र क्रियापदं किं प्रयुक्तम् ?

**15. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्)** **1x4=4**

(क) **<u>धेनूनां</u>** माता सुरभिः आसीत् ।

(ख) सिंहः **<u>वानराभ्यां</u>** स्वरक्षायाम् असमर्थः एवासीत् ।

(ग) **<u>चौरस्य</u>** पादध्वनिना अतिथिः प्रबुद्धः।

(घ) सर्वे **<u>प्रकृतिमातरं</u>** प्रणमन्ति।

(ङ) जनकेन **<u>सुताय</u>** शैशवे विद्याधनं दीयते ।

**16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयित्वा पुनः लिखत -** **1x4-4**

य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।

न कुर्यादहितं कर्म स परेभ्यः कदापि च॥

**अन्वयः**- यः (i) --------- श्रेयः(ii) --------- सुखानि च इच्छति, परेभ्यः अहितं (iii) --------- कदापि च न (iv) -------- ।

**मञ्जूषा-**

| | | | |
|---|---|---|---|
| कर्म, | कुर्यात्, | प्रभूतानि, | आत्मनः |

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनःलिखत –** 1x4=4

मृगा मृगैः सङ्गमनुव्रजन्ति, गावश्च गोभिः तुरगास्तुरङ्गैः।

मूर्खाश्च मूर्खैः सुधियः सुधीभिः, समान-शील-व्यसनेषु सख्यम् ॥

भावार्थः- मृगाः (i) --------- सह, (ii) --------- गोभिः सह, तुरगाः तुरङ्गैः सह, (iii) --------- मूर्खैः सह, सुधियः (iv) ------- सह अनुव्रजन्ति। समानशीलव्यसनेषु सख्यम् भवति।

**मञ्जूषा**

| | | | |
|---|---|---|---|
| मृगैः, | सुधीभिः, | गावश्च, | मूर्खाः |

**17. अधोलिखित-कथांशं समुचित-क्रमेण लिखत -** **½x8=4**

(i) चौरः चौरार्थं गृहं प्रविष्टः।

(ii) सत्यं निश्चित्य न्यायाधीशः आरक्षिणे कारादण्डं आदिष्टवान्।

(iii) प्रमाणाभावात् अग्रिमे दिने उपस्थातुम् आदिष्टवान्।

(iv) पुत्रः छात्रावासे वसति।

(v) न्यायाधीशः तं देहं आनेतुम् आरक्षिणं अभियुक्तं च प्रेषितवान्।

(vi) वस्तुतः आरक्षी एव चौरः आसीत्।

(vii) अर्थकार्श्येन पीडितः पिता बसयानं विहाय पदातिरेव प्राचलत्।

(viii) न्यायाधीशः पृथक् – पृथक् विवरणं श्रुतवान्।

**18 अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत- (केवलं प्रश्नत्रयम्)** **1x3=3**

(i) <u>**परुषां**</u> वाचं न अभ्युदीरयेत् ।

(क) मधुराम् (ख) गर्वयुक्ताम्

(ग) कठोराम् (घ) मृदुवाणीम्

(ii) सः <u>**अर्थकार्श्येन**</u> पीडितः आसीत्।

(क) धनस्य अभावेन (ख) अधिक धनेन

(ग) शब्दार्थेन (घ) भूरि श्रमेन

(iii) एकः <u>**जवेन**</u> गन्तुमशक्तः आसीत्।

(क) मन्दगत्या (ख) तीव्रगत्या

(ग) हलेन (घ) पादेन

(iv) सा गहन<u>**कानने**</u> चलति ।

(क) कर्णे (ख) मार्गे

(ग) कोणे (घ) वने

***********************************